A-066

॥अथ कूष्मांडहोमप्रयोगः॥

॥पत्र १०॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

कू॰
१

॥श्रीगणेशायनमः॥अथकूश्मांडहोमोलिख्यते॥ ॥अग्नीनाधास्यमानःपापस्यतारतम्यंविचार्यसंवत्सरंमासंचतुर्विंशतिदिनानिषट्दिनानित्रीणिदिनानिवाकूश्मांडैर्जुहुयात्।अमावास्यायांपौर्णमास्यांवोपक्रमः॥अथकूश्मांडहोमप्रयोगः॥प्राणान्नायम्यतिथ्यादिसंकीर्त्यआधानाधिकारसंपादकसमस्तपापनिर्हरणार्थंकूश्मांडैर्होष्येइतिसंकल्प्यश्मश्रुकेशलोमनखानिवापयित्वास्नानादिविधायपुण्याहंवाचयित्वाततःस्थंडिलादिअग्निमुखांतंकृत्वाआघारांतंसंकल्प्यसवितारंचरुद्रव्येणदेवादीस्तत्तन्मंत्रार्थेनाज्येनकूश्मांडान्वाधानं।सवितारंचरुणा।देवानादित्यान्।१विश्वा १

अग्निं२

न्देवान्१द्यावापृथिव्योम रस्वतीं१इंद्राग्निमित्रावरुणासोमधातबृहस्पतीन्१जातवेदसं१अग्निं१ज्योतिषं१अग्निमनृणं१अग्निंगार्हपत्यं१अग्निमनृणं१ अग्निंगार्ह॰१ अग्निंगार्ह॰१ अग्निंगार्ह॰१ अपःशुंधनीः१ अपोहिरण्यवर्णाः१ वरुणं२अग्नीवरुणौ२अग्निमयसं१अग्नीद्वौ३उग्रंपश्याराधृग्नतावसरसौ१उग्रंपश्याराधृग्नतौ१वरुणं४अग्नीवरुणौ२संकुसुकविकुसुकनिर्ऋथनिस्वनान्।कृत्यांनिर्ऋतिंदुःशंसानुशंसघणानुघणान्।त्वष्टारं।अग्निमायुष्मंतं।आयुर्दामग्निं।अग्निवरुणादितिविश्वान्देवान्।अग्निंपवमानं२अग्निंजातवेदसं२अग्निंरक्षोहणं।अग्निंउषसंनिमुचं।देवान्।जातवेदस

२

मग्निं॰अग्निंवैश्वानरं॰त्विषिं॰अग्निमभ्यावर्तिनं॰॥शेषेणास्विष्टकृतमित्यादिसंकल्प्यआघा
रांतंतंत्रंकृत्वातत्सवितुर्वरेण्यमित्येतयाचरुंसवित्रेहुत्वास्विष्टकृतमवदायांतःपरिधिसा
दयित्वाज्याहुतीर्जुहोति॥यद्देवादेवहेळनमित्येकविंशार्चस्यप्रथमानुवाकस्यस्वयंभूर्ब्र
ह्माऋषिःलिंगोक्तदेवताः॰आद्याश्चतस्रोनुष्टुभः॰पंचमीत्रिष्टुप्षष्ठ्यतिजगतीसप्तमीज
गती॰अष्टमीत्रिष्टुप्नवमीजगतीदशमीबृहतीद्वादशक्रयोत्रियोदशीत्रिष्टुप्चतुर्दश्यष्टी
पंचदश्यनुष्टुप्षोडशीविराट्सप्तदशीगायत्रीतिस्रस्त्रिष्टुभः॰एकविंशत्यनुष्टुप्॰य
द्दीव्यमितित्रयोदशार्चस्यद्वितीयानुवाकस्यब्रह्मास्वयंभूर्ऋषिःलिंगोक्तदेवताः २

॰आद्यापंक्तिश्चतस्रस्त्रिष्टुभःषष्ठीगायत्रीतिस्रस्त्रिष्टुभःदशम्यनुष्टुप्एकादश्युष्णिक्द्वा
दश्यनुष्टुप्त्रयोदशीत्रिष्टुप्॥आयुष्टइतिसप्तदशार्चस्यतृतीयानुवाकस्यब्रह्मास्वयंभू
र्ऋषिःलिंगोक्तदेवताः॰आद्यानुष्टुप्॰द्वेत्रिष्टुभौतिस्रोगायत्र्योद्वेत्रिष्टुभौषडनुष्टुभःपंच
दशीककुप्नवतीषोडश्यनुष्टुप्सप्तदशीशाक्वरी॰आज्यहोमेविनियोगः॥ ॥यद्देवादेवहे
ळनंदेवासश्चकृमावयं॰॥आदित्यास्तस्मान्मामुंचतंतस्यतेनुमामिनस्वाहा॰देवेभ्यआ
दित्येभ्यइदंनममा॰देवाजीवनकाम्यायद्वाचानृतमूदिम॰॥तस्मान्नइहमुंचतविश्वेदे
वाःसजोषसःस्वाहा॰विश्वेभ्योदेवेभ्यइदं॰॥ऋतेनद्यावापृथिवीऋतेनत्वंसरस्वति॥

कृतान्नः पाह्येनसो यत्किंचानृतमृदिमस्वाहा॥द्यावापृथिवीभ्याꣳसरस्वत्याइदं॰॥इंद्राग्नि मित्रावरुणासोमधातर्बृहस्पतिः॥तेनोमुंचंत्वेनसो यदन्यकृतमारिमस्वाहा॥इंद्राग्निमित्रावरुणासोमधातर्बृहस्पतिभ्यइदं॰॥सजातानꣳसादुतजामिमꣳसाज्न्यायसꣳसादुतवाकनीयसः॥अनाधृष्टदेवकृतंयदेनस्तस्मात्त्वमुरुमान्जातवेदोमुमुग्धिस्वाहा॥जातवेदसइदं॰॥यद्वाचायन्मनसाबाहुभ्यामूरुभ्यामष्ठीवद्भ्यांꣳशिश्नैर्यदनृतंचकृमावयं॥अग्निर्मातस्मादेनसः प्रमुंचतुचकृमयानिदुष्कृतास्वाहा॥अग्नय इदं॰॥येनत्रितोऽअर्णवान्निर्बभूवयेनसूर्यंतमसोनिर्मुमोचयेनेद्रोविश्वा २

अजनहादरातीस्तेनाहंज्योतिषाज्योतिरानशानऽआशिस्वाहा॥ज्योतिषइदं॰॥यत्कुसीदमप्रतीत्तमयेहयेनंयमस्यनिधिनाचरामि॥एतत्तदग्नेऽअनृणोभवामिनीवन्नेवप्रतितन्नेदधामिस्वाहा॥अग्नयेइदं॰॥यन्मयिमातागर्भेसत्येनश्वंकारयसिता॥अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिचकृमकुरोतुमामनेनसꣳस्वाहा॥अग्नयेगार्हपत्यायेदं॰॥यदापिपेषमातरंपितरंपुत्रः प्रमुदितोधयन्॥अहिꣳसितोपितरोमयातत्तदग्नेऽअनृणोभवामिस्वाहा॥अग्नयेऽअनृणायेदं॰॥यदंतरिक्षंपृथिवीमुतद्यायन्मातरंपितरंवाजिहिꣳसिम॥अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतु

अनृणाये

दुरितायानिचकुमकुरोतुमामंतेनसꣳस्वाहा॥अग्नयेगार्ह०॥यदाशसानिशसाम्यस्याश
सायदेनश्चकृमानतंनंयसुराणं॥अग्निर्मातस्मादेनसोगार्ह०नसꣳस्वाहा॥अग्नयेगा०॥
अतिक्रामामिदुरितंयदेनोजहामिरिप्रंपरमेसधस्थे॥यत्रयंतिसुकृतोनापिदु
ष्कृत स्तमारोहामिसुकृतांनुलोकꣳस्वाहा॥अग्नयइदं०॥त्रितेदेवाअमृजतैतदे
नस्त्रितएतन्मनुष्येषुमामृजे॥ततोमा यदिकिंचिदानुशेग्निर्मातस्मा०नसꣳस्वाहा॥
अग्नयेगार्ह०॥दिविजाताअप्सुजाताओषधीभ्यः॥अथोयाअग्निजाआप
स्तानःशुंधंतुशुंधेनीःस्वाहा॥अद्भ्यःशुंधनीभ्य०॥यदापोनक्तंदुरितंचरामियद्वादिवा ४

नूतनंनंयसुराणं॥हिरण्यवर्णास्तनउसुनीतनꣳस्वाहा॥अद्भ्योहिरण्यवर्णाभ्य०॥इमं
मेवरुण०वरुणाये०॥तत्त्वायामि०॥वरुणाये०॥त्वंनोअग्ने०॥अग्नीवरुणाभ्या०॥स
त्वंनोअग्ने०॥अग्नीवरुणाभ्यामिदं०॥त्वमग्नेव्रया०॥अग्नयेव्रयसइदं०॥१॥यदहो
व्यंनृणमहंबभ्रुवादित्सन्वासंजगरजनेभ्यः॥अग्निर्मातस्मादिंद्रश्चसंविदानोप्र
मुंचताꣳस्वाहा॥अग्नीद्राभ्यामिदं०॥यद्वस्तोभ्यांचकरकिल्बिषाण्यक्षाणांवयुमु
पजिघ्रमानः॥उग्रंपश्याराष्ट्रभृच्चुतान्यप्सरसावनुदत्तामृणानिस्वाहा॥उग्रं
पश्याराष्ट्रभृद्भ्यामप्सरोभ्यामिदं०॥उग्रंपश्येराष्ट्रभृत्किल्बिषाणियदक्षरंत्त

मनुदत्तमेतत्॥नेन्नंऽरुणानुणवृऽसमानोयुमस्यलोकेऽधिरज्जुरायुस्वाहा॥उयं
पञ्चाराष्ट्रभृऽय्यामिदं॰॥अवतेहेळोवरुण॰वरुणायेदं॰॥उदुत्तमंवरुणपाऽ॰॥वरुण
येदं॰॥इमंमेवरुण॰॥तत्त्वायामि॰॥त्वंनोऽअग्ने॰॥सत्वंनोऽअग्ने॰॥संकुसुकोविकुसुको
निर्ऋथोयश्चनिस्वनः॥तेयेऽस्मद्यक्ष्ममनागसोदूरादूरमचीचतऽस्वाहा॥संकुसुक
विकुसुकनिर्ऋथनिस्वनेभ्यऽइदं॰॥निर्यक्ष्ममचीचतेकृत्यांनिर्ऋतिंच॥तेनयोऽस्मत्स
मृछातेतमंस्मेप्रसुवामसिस्वाहा॥कृत्यायैनिर्ऋतयऽइदं॰॥दुःशꣳसानुशꣳसाभ्यां
घृणोनानुघृणेनच॥तेनाऽन्योऽस्मत्समृछातेतमंस्मेप्रसुवामसिस्वाहा॥दुःशꣳसानु ५

शꣳसघृणानुघृणेभ्यऽइदं॰॥संवर्चसापयसासंतनूभिरगन्महिमनासासꣳशिवेन॥
त्वष्टानोऽअत्रविदधातुरायोनुमार्ष्टुतन्वोऽयद्विलिष्टꣳस्वाहा॥त्वष्टरिदं॰॥२॥आयुष्टे
विश्वतोदधदयमग्निर्वरेण्यः॥पुनस्तेप्राणऽआयातिपरायक्ष्मꣳसुवामितेस्वाहा॥अग्न
यऽइदं॰॥आयुर्दाऽअग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि॥घृतंपीत्वामधु
चारुगव्यंपितेवपुत्रमभिरक्षतादिमꣳस्वाहाऽआयुर्दाऽअग्नयऽइदं॰॥इमंमेऽग्नऽआयुषेवर्च
सेसुप्रजास्त्वायमोजोवरुणसꣳशिशाधि॥मातेरायाꣳसमदितेशर्मयच्छविश्वेदेवाज
रदष्टिर्यथासत्स्वाहा॥अग्निवरुणादितिविश्वेभ्योदेवेभ्यऽइदं॰॥अग्नऽआयूꣳषिपव

+ अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥ दधद्रयिंमयिपोषंस्वाहा॥अग्नयेपवमा॰॥२+

सुआसुवोर्जमिषंचनः॥आरेबाधस्वदुछुनां॑स्वाहा॥अग्नयेपवमानायेदं॰॥अग्नि
र्ऋषिःपवमानःपांचजन्यःपुरोहितः॥तमीमहेमहागयं॑स्वाहा॥अग्नयेपव॰॥अग्ने
जातान्प्रणुदानःसपत्नान्प्रत्यजातान्जातवेदोनुदस्व॥अस्मेदीदिहिसुमनाअहेड॒
छमैतेस्यामत्रिवरूथउद्भौस्वाहा॥जातवेदसेअग्नयइदं॰॥सहसाजातान्प्रणुदानःस
पत्नान्प्रत्यजातान्जातवेदोनुदस्व॥अधिनोब्रूहिसुमनस्यमानोवयं॑स्यामप्रणु
दानःसपत्नान्स्वाहा॥जातवेदसेअग्नयइदं॰॥अग्नेयोनोभितोजनोवृकोवारोअघा॑
सति॥तां॑स्त्वंवृत्रहंजहिवस्वस्मभ्यमाभर॒स्वाहा॥अग्नयेरत्न घ्नइदं॰॥अग्ने ६

योनोभिदासतिसमानोयश्चनिष्ट्यः॥तंवयं॑समिधंकृत्वातुभ्यमग्नेपिदध्मसिस्वा
हा॥अग्नयइदं॰॥योनःशपादशपतोयश्चनःशपतःशपात्॥वृषाश्वतस्मैनिग्रुक्तसर्वं
पापं॑समूहनां॑स्वाहा॥उषसेनिग्रुचइदं॰॥योनःसपत्नोयोरणोमनोभिदासतिदेवाः॥
इध्मस्येवप्रक्षायतोमातस्योछेषिकिंचनस्वाहा॥देवेभ्यइदं॰॥योमाद्वेष्टिजातवेदोयंचा
हंद्वेष्मियश्चमां॥सर्वां॑स्तानग्नेसंदहयां॑श्चाहंद्वेष्मियेचमां॑स्वाहा॥जातवेदसेअग्नय
इदं॰॥योअस्मभ्यमरातीयाद्यश्चनोद्वेषतेजनः॥निंदाद्योअस्मान्मिप्साच्चसर्वस्तान
मस्मसाकुरुस्वाहा॥अग्नयइदं॰॥सं॑शितंमेब्रह्मसं॑शितंवीर्यं॑बलं॥सं॑शितंक्ष

त्रंमेऽग्निष्ठ्रुयस्याहमस्मिपुरोहितःस्वाहा॥अग्नयइदं॰॥उदेषांबाहूअतिरमुद्वर्चोअथो
बलं॥क्षिणोमित्रब्रह्मणामित्रानुन्नयामिस्वाँअहंस्वाहा॥अग्नयइदं॰॥पुनर्मनःपुनरा
युर्मआगात्पुनश्चक्षुःपुनश्श्रोत्रंमआगात्पुनःप्राणःपुनराकूतंमआगात्पुनश्चित्तंपुन
रधीतंमआगात्॥वैश्वानरोमेदध्यत्तनूपाअवबाधतांदुरितानिविश्वास्वाहा॥अग्न
येवैश्वानरायेदं॰॥ सिंहेव्याघ्रउतयाषदाकौलिषिरश्नोब्रह्मणेसूर्यया॥इडेयादे
वीसुभगाजुजानुसानुआगन्वर्चसासंविदानास्वाहा॥त्विष्याइदं॰॥याराजन्येदुदुभा
वायतायामश्वस्यक्रंद्यपुरुषस्यमायो॥इडेयादेवी॰दानास्वाहा॥त्विष्याइदं॰॥याहस्ति ७

निह्वापिनियाहिरण्येत्विषिरश्वेषुपुरुषेषुगोषु॥इडेयादेवी॰दानास्वाहा॥त्विष्याइदं॰॥
रथेअक्षेषुवृषभस्यवाजेवातेपर्जन्यवरुणस्यशुष्मे॥इडेयादेवी॰दानास्वाहा॥त्विष्या
इदं॰॥अग्नेभ्यावर्तिन्नभिनआवर्तस्वायुषावर्चसाप्रजयाधनेनस्वाहा॥
अग्नयेभ्यावर्तिनइदं॰॥अग्नेअंगिरःशतंतेसंत्वाहतःसहस्रंतेउपाहतः॥तासांपोष
स्यपोषेणपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधिस्वाहा॥अग्नयेभ्यावर्तिनइदं॰॥
सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया॥विश्वप्स्न्याविश्वतस्परिस्वाहा॥अग्न
येभ्यावर्तिनइदं॰॥४॥अथयजमानःसमित्पाणिःस्वायतनेतिष्ठन्नग्निमुपति

ष्ठपुनरूर्जानिवर्तस्वपुनरग्नइषायुषा॥पुनर्नःपाहिविश्वतःस्वाहा॥अग्नयेभ्यावर्ति॰॥२

ष्ठते॥वैश्वानरायप्रतिवेदयामोयदीन्द्रोऽसंगरोदेवतासु॥सएतान्याशान्प्रमुच्
श्रवैदसनोमुंचातुदुरितादवद्यात्॥वैश्वानरःपवयान्नःपवित्रेर्यत्संगरमुक्षिधावा
म्याशां॥अनाजानन्मनसायाचमानोयदत्रैनोअवृतत्सुवामि॥अमीयेसुभगेदि
विविष्ठेनोनामतारके॥प्रेहामृतस्ययछतामेतद्वदूकंमोचनं॥विजिह्मीर्घलोकान्नू
धिबुध्नान्मुंचासिबद्धकं॥योनेरिवप्रच्युतोगर्भःसर्वान्यथोअनुष्व॥सप्रजानन्प्रतिगृभ्णा
नविद्वान्प्रजापतिःप्रथमजाऋतस्य॥अस्माभिर्दत्तंनुरसःपुरस्तादछिन्नंतंतुमनुसं
चरेम॥तंतंतंतुमन्वेकेअनुसंचरंतियेयांदत्तंपित्र्यमायनवत्॥अबंध्वेकेदर्तःप्रय ८

छाद्यांचेछ्रुक्वाःसस्वर्गएषां॥आरभेथामनुसंरभेथांसमानंपंथांमवथोघृते
न॥यद्द्यावापृथिविमुंचतंसमेगोत्रायेहजायापतीसंरभेथां॥यदंतरिक्षंपृथिवीमु
तद्यांयन्मातरंपितरंवाजिहिंसिमा॥अग्निर्मातस्मादेनसोगार्हपत्युउन्नेनषदुरितायां
निचक्रुमाभूमिर्मातादितिर्नोजुनित्रंभ्रातांतरिक्षमभिशस्तएनः॥द्यौर्नःपितापितृया
छंभवासिनाभिमित्वामाविवित्तिलोकांत॥यत्रसुहार्दःसुकृतोमदंतेविहायुरोगंतन्वंसं
स्वायां॥अश्लोणांगैरङ्गताःस्वर्गेतत्रपश्येमपितरंचपुत्रं॥यदन्नमद्म्यनृतेनदेवा
दास्यन्नदांस्यन्नुतवांकरिष्यन्॥यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्रतिजग्राह

मुग्निर्मातस्मादनृणंकृणोतु॥यदन्नमद्भिंबहुधाविरूपंवासोहिरण्यमुतगामुनाम
विं॥यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतु॥
इत्युपस्थायत्रयोदश्यासमिधमादधाति॥युन्मयामनसावाचाकृतमेनःकदाचन॥
सर्वस्मात्तस्मान्मेत्वंनोमाग्निध्रत्वंहिवेत्थयथातथंस्वाहा॥अग्नयइदं॥हव्यवाह
मभिमातिषाहंरक्षोहणंपृतनासुजिष्णु॥ज्योतिष्मंतंदीद्यतंपुरंधिमग्निंस्विष्ट
कृतमाहुवेमो॥स्विष्टमग्नेअभितत्पृणाहिविश्वादेवपृतनाअभिष्य॥इडस्पदेसमिधा
प्रदिशन्विभाहिज्योतिष्मद्देह्यजरंनआयुःस्वाहा॥अग्नयेस्विष्टकृतइदं॥रज्जुप्र ९

हरणादिवरदानांतंकृत्वाअग्नेःपुरस्तादश्वत्थपर्णेषुहुतशेषंनिदध्यात्॥यावद्धो
मदिनानितावन्मांसस्त्रीपर्यंकशयनानृतवर्जनंपयोभक्षणमशक्तौवोदनादि॥
॥इतिकूश्मांडहोमप्रयोगः॥ ॥श्रीरस्तु॥ ॥शुभंभवतु॥ ॥शके१७०४शुभन
नामसंवत्सरेआषाढशुद्धद्वादश्यांसमापितंथाल्युपनामकशेषभट्टेन॥ ॥
॥श्रीः॥ ॥छ॥ १०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ राम ॥ ॥ इति कूष्मांड होमः समाप्तः ॥ पत्र १० ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY